हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-344 | 1 | अक्तूबर, 09 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णतृतीया
आश्विन २३ प्रविष्टांशः मङ्गलमयः भवेत्

2 दीपावलीतः पूर्वं दैनिकवेतन-कर्मचारिणः, बहिःकार्यकर्तारः, शिक्षकाः च उपहारं प्राप्तवन्तः, सर्वकारेण मानधने वृद्धिः कृता

3 हरिद्वारे अस्थि-विसर्जनार्थं हिमाचलपथपरिवहननिगमेन निःशुल्कयात्रा व्यवस्थायै प्रदत्तम् अनुज्ञापत्रम्

4 बिहारराज्यस्य डीएवीपब्लिक-स्कूलबरारीभागलपुरविद्यालये एकलनृत्यप्रतियोगिता सम्पन्ना

## लोकनायक-जयप्रकाश-नारायणस्य पुण्यतिथ्यां उपराष्ट्रपतिः सी. पी. राधाकृष्णन श्रद्धाञ्जलिम् अर्पितवान्



**हिमसंस्कृतवार्ताः -** उपराष्ट्रपतिः सी. पी. राधाकृष्णन इत्येषः स्वातन्त्र्ययोद्धः लोकनायक-जयप्रकाश-नारायणस्य पुण्यतिथ्यां श्रद्धाञ्जलिम् अर्पितवान्। सामाजिक-प्रसार-माध्यमे उपराष्ट्रपतिः आपत्कालिके काले जयप्रकाश नारायणस्य योगदानं स्मरन् अवदत् यत् सः प्रशासनस्य सर्वाधिकारवादिकविचारं विरुध्य ऐतिहासिकस्य जनान्दोलनस्य नेतृत्वं कृतवान्, येन जनाः लोकतन्त्रस्य, नागरिकस्वातन्त्र्यस्य, संवैधानिकमूल्यानाञ्च रक्षणार्थं प्रेरिताः अभवन्। उपराष्ट्रपतिः नवदेहल्ल्याः संविधान-सदने लोकनायक जयप्रकाश नारायणं प्रति पुष्पांजलिम् अर्पितवान्। गृहमन्त्री अमितशाहः अपि स्वातन्त्र्ययोद्धः पुण्यतिथ्यां श्रद्धाञ्जलिम् अर्पितवान्।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदेहल्यां यशोभूमिस्थे इण्डिया-मोबाईल-काङ्ग्रेस इत्यस्य नवमसंस्करणस्य उद्घाटनं कृतम्




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदेहल्यां यशोभूमिस्थे इण्डिया-मोबाईल-काङ्ग्रेस इत्यस्य नवमसंस्करणस्य उद्घाटनं कृतम् । प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् देशे डिजिटल-सम्पर्कः न तु विशेषाधिकारः न च विलासः अस्ति अपितु प्रत्येकस्य नागरिकस्य जीवनस्य अभिन्नः भागः अस्ति। श्रीमोदी नवदेहल्ल्याः यशोभूमौ एशिया महाद्वीपस्य वृहत्तमस्य दूरसञ्चार माध्यम-तन्त्रज्ञान-कार्यक्रमस्य नवमस्य संस्करणस्य इण्डिया-मोबाईल-काङ्ग्रेस-इत्यस्य उद्घाटनानन्तरं सम्बोधयन् आसीत्। श्रीमोदी अवदत् यत् देशः पूर्वं 2जी इत्यस्य समस्यां सम्मुखीकृतवान्, अधुना प्रायः प्रत्येकस्मिन् मण्डले 5जी इत्यस्य व्याप्तिः अस्ति। प्रधानमंत्री अवदत् यत्, भारतेन सद्यः एव स्वस्य मेड-इन-इण्डिया 4 जि-स्टैक इत्यस्य आरम्भः कृतः, यद्धि देशस्य प्रमुखं स्वदेशीयं साफल्यम् अस्ति। भारतं अधुना विश्वस्य डिजिटल इति क्षेत्रस्य ध्वजवाहकः अस्ति- ज्योतिरादित्यसिन्धिया । अस्मिन् अवसरे सम्प्रेषणमन्त्री ज्योतिरादित्यसिन्धिया अवदत् यत् भारतं अधुना विश्वस्य डिजिटल इति क्षेत्रस्य ध्वजवाहकः अस्ति। चतुर्दिवसीयेऽस्मिन् कार्यक्रमे दूरसञ्चारक्षेत्रे उदयोन्मुखप्रौद्योगिकीषु च नवीनतमप्रगतिः प्रदर्श्यते, येन वैश्विकप्रमुखाः, नीतिनिर्मातारः, उद्योगविशेषज्ञाः, आविष्कर्तारश्च सम्मिलिताः भविष्यन्ति।

## सुभाषितम्

**एवं प्रज्ञैव परमं,**
**बलं न तु पराक्रमः।**
**यत्प्रभावेण निहतः,**
**शशकेनापि केसरी।।**
-महासुभषितसंग्रह

बुद्धिमानी ही सर्वोत्तम बल (शक्ति) है न कि वीरता। बुद्धिमानी के ही प्रभाव से एक छोटे से शशक (खरगोश) ने एक शक्तिशाली सिंह को निहत कर दिया था।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु
To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## भारतीय-वायुसेनायाः त्रिनवतितमं वार्षिकोत्सवम् गतदिवसे आचरितम्

हिमसंस्कृतवार्ताः - भारतीय-वायुसेनायाः त्रिनवतितमं वार्षिकोत्सवं गतदिवसे आचरितम्। अवधेयमस्ति यत् द्वात्रिंशदुत्तरैकोनविंशतितमे वर्षे अक्टूबर-मासस्य अष्टमे दिनाङ्के अस्याः सेनायाः स्थापना अजायत्। गाजियाबादस्य हिण्डन-वायुस्थानके जनसमूहं सम्बोधयन् वायुसेनायाः प्रमुखः एयर-चीफ-मार्शल अमर-प्रीत-सिंहः अवदत् यत्, आपरेशन-सिन्दूर इत्यस्य समये भारतीय-वायुदलेन महत्वपूर्णा भूमिका निर्वोढा। रक्षाध्यक्षः जनरल अनिल चौहानः, स्थलसेनाध्यक्षः जनरल उपेन्द्र द्विवेदी नौसेनाध्यक्षः एडमिरल दिनेश के. त्रिपाठी, वायुसेनाध्यक्षश्च नवदेहल्याः राष्ट्रिय-युद्धस्मारके वीरयोद्धभ्यः श्रद्धाञ्जलिम् अर्पितवन्तः। राष्ट्रपतिः द्रौपदी मुर्मूः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् इत्येषः, प्रधानमन्त्री नरेन्द्रमोदी च सर्वेभ्यः वायुसैनिकेभ्यः, पूर्वसैनिकेभ्यः, तेषां परिजनेभ्यश्च शुभाशयान् अयच्छन्।

## भारत-यूके-व्यापक-रणनीतिक-अभिसन्धि-प्रगतेः समीक्षां कर्तुं द्विदिवसीय-भ्रमणार्थं ब्रिटिश-प्रधानमन्त्री केयर-स्टारमरः मुंबईनगरे सम्प्राप्तः



हिमसंस्कृतवार्ताः - मुम्बई-नगरे स्वस्य भ्रमणस्य प्रथमदिने वाणिज्यनेतृन् सम्बोधयन् युनैटेड् किङ्गडम् -देशस्य प्रधानमन्त्री केयर स्टारमर-वर्यः अवदत् यत् भारत-यू. के. मुक्तव्यापार-सन्धिः इति यूरोपियन्-यूनियन इत्यतः निष्कासनात् परं युनैटेड् किङ्गडम् देशेन हस्ताक्षरितः बृहत्तमः व्यवहारः अस्ति। सः इत्यपि अकथयत् यत् एतत् युनैटेड् किङ्गडम् इत्यनेन भारतं प्रति प्रेषितं बृहत्तमं वाणिज्याभियानम् अस्ति।

## अस्य वर्षस्य रसायनशास्त्रस्य नोबेल-पुरस्कारस्य घोषणा जाता




हिमसंस्कृतवार्ताः - अस्य वर्षस्य रसायनशास्त्रस्य नोबेल-पुरस्कारस्य घोषणा जाता। धातु-जैविक-संरचनायाः विकासाय अमेरिकादेशस्य ओमर एम. यागी, जापान्-देशस्य सुसुमु कितागावा, आस्ट्रेलिया-देशस्य रिचर्डराब्सन इत्येते त्रयः वैज्ञानिकाः अस्य वर्षस्य रसायनशास्त्रस्य नोबेल-पुरस्कारं प्राप्तवन्तः ।

## जम्मू-कश्मीरे श्रीमाता वैष्णोदेवी-यात्रा अतिवृष्टिकारणात् त्रिदिवसाः यावत् स्थगितानन्तरं पुनः आरब्धा



हिमसंस्कृतवार्ताः - जम्मू-कश्मीर-प्रदेशे प्रतिकूल-ऋतोः कारणेन निरन्तरतया दिनत्रयेभ्यः स्थगिता श्रीमातुः वैष्णोदेव्याः तीर्थयात्रा पुनः आरब्धा अस्ति। त्रिकुटा-पर्वतप्रदेशे प्रचण्डवृष्टेः, भूस्खलनस्य च सम्भावनया पवित्र-गुहा-तीर्थस्य तीर्थयात्रा स्थगिता आसीत्।

# दीपावलीतः पूर्वं दैनिकवेतनकर्मचारिणः, बहिःकार्यकर्तारः, शिक्षकाः च उपहारं प्राप्तवन्तः, सर्वकारेण मानधने वृद्धिः कृता




**हिमसंस्कृतवार्ताः- शिमला।** पंचायत-नगरनिर्वाचनात् पूर्वमेव जनप्रतिनिधिनां मानदं वर्धितम् अस्ति। मुख्यमन्त्री सुक्खुः दिवालीतः पूर्वमेव एतत् उपहारं प्रदत्तवान् अस्ति। अपि च दैनिकवेतनकार्यकर्तृणां वेतनमपि वर्धितम् अस्ति। लम्बरदाराणां, एस. एम. सी. शिक्षकाणां, सुरक्षाकर्मचारिणां च मानधनं वर्धितम् अस्ति। बुधवासरे सः सर्वेभ्यः विभागेभ्यः तत्कालं प्रभावेण अस्य कृते सूचनाः निर्गन्तुम् आदेशं दत्तवान्। मुख्यमन्त्री २१,११५ मध्याह्नभोजनकार्यकर्तृणां मानदं ₹५०० रुप्यकाणि वर्धितवान् इदानीं तेभ्यः ५,००० रुप्यकाणि प्रदास्यते। तथैव ८७७ एस. एम. सी. सी एण्ड वी इत्यस्य मानदं ₹१५,५०९ तः ₹१६,००९ यावत् वर्धितम्, ८३३ एसएमसी प्रवक्तृणां डीपीई च मानदं ₹५०० वर्धयित्वा १९,३७८ ₹ यावत् कृतम् अस्ति ४९१ एसएमसी टीजीटी इत्यस्य मानदं ५०० रुप्यकेण १९,३७८ रुप्यकाणि, ६२ एसएमसी जेबीटी ५०० रुप्यकेन १३,७६२ रुप्यकाणि, ३१ जलवाहकानाम् ५०० रुप्यकेन ५,५०० रुप्यकाणि यावत् वर्धितम् अस्ति।

राज्यसर्वकारेण विशेषपुलिसपदाधिकारिणां मानदं ३०० रुप्यकाणि, आउटसोर्स कर्मचारिणां मानदं १२७५० रूप्यकाणि, सूचनाप्रौद्योगिकीशिक्षकाणां मानदं ५०० रूप्यकाणि च वर्धितम् अस्ति। ततश्च मुख्यमन्त्री दैनिकवेतनप्राप्तानाम्, अंशकालिक- कार्यकर्तृणां च दैनिकवेतनं २५ रुप्यकेण वर्धयित्वा ४२५ रुप्यकाणि यावत् वर्धितवान् ५०० रुप्यकाणां वृद्धिः कृता अस्ति, १३९९ पंचायतचौकीदारानाम् अपि ५०० रुप्यकाणां वृद्धिः ८५०० रुप्यकाणि यावत् कृता अस्ति। ९७० राजस्वचौकीदाराणां मानदं ५०० रूप्यकेन वर्धयित्वा ६३०० रूप्यकाणि यावत् अभवत्। ३,३०४ लम्बरदाराणां मानदं ₹३०० तः ₹४,५०० यावत् वर्धितम् अस्ति।

## पंचायतीराजसंस्थानां प्रतिनिधिभ्यः उपहारः

राज्यसर्वकारेण पंचायतीराजसंस्थानां, नगरीयस्थानीयनिकायानां च प्रतिनिधिनां मानदं वर्धितम्। जिलापरिषदाध्यक्षस्य मानदं ₹१,००० वर्धयित्वा ₹२५,००० यावत्, उपाध्यक्षस्य च ₹१९,००० यावत् वर्धितम्। जिलापरिषद् सदस्यानां मानदं ₹५०० वर्धयित्वा ₹८३०० यावत् जातम्, पंचायतसमिति- अध्यक्षस्य मानदं ₹६०० वर्धयित्वा ₹१२००० यावत्, पंचायतसमिति उपाध्यक्षस्य मानदं ₹६०० वर्धयित्वाः ₹९००० यावत् अभवत्, पंचायत समिति सदस्यस्य च ₹300 वर्धयित्वा ₹७५०० रुप्यकाणि अभवत्। ग्रामपञ्चायतप्रधानस्य मानदं ३०० रुप्यकाणि वर्धयित्वा ७५०० रुप्यकाणि, उपप्रधानस्य मानदं ३०० रुप्यकाणि वर्धयित्वा ५१०० रुप्यकाणि, ग्रामपञ्चायतसदस्यस्य मानदं ६०० रुप्यकाणि वर्धयित्वा २१०० रुप्यकाणि यावत् जाततम् अस्ति।

## नगरनिगमप्रतिनिधीनां मानदेयम् अपि वर्धितम्-

नगरनिगमस्य महापौरस्य मानदं १,००० रुप्यकाणि वर्धयित्वा २५,००० रुप्यकाणि, उपमहापौरस्य मानदं १,००० रुप्यकाणि वर्धयित्वा १९,००० रूप्यकाणि यावत्, पार्षदानां मानदं १,००० रुप्यकाणि वर्धयित्वा ९,४०० रूप्यकाणि यावत् कृतम् अस्ति। नगर परिषदः अध्यक्षस्य मानदं ६०० रुप्यकाणि वर्धयित्वा १०,८०० रूप्यकाणि, उपाध्यक्षस्य मानदं ५०० रुप्यकाणि वर्धयित्वा ८,९०० रूप्यकाणि, पार्षदानां मानदं ३०० रुप्यकाणि वर्धयित्वा ४,५०० रूप्यकाणि, नगरपञ्चायतप्रधानस्य मानदं रु ६०० वर्धयित्वा ९,००० रुप्यकाणि, उपप्रधानस्य मानदं ४०० वर्धयित्वा ७,००० रुप्यकाणि, नगरपञ्चायतसदस्यस्य मानदं ३०० वर्धयित्वा ४५०० रुप्यकाणि यावत् वर्धितम् अस्ति।

# उपालम्भानां प्राप्ते सत्यपि लोकनिर्माणविभागेन कार्यम् किमर्थं न कृतम् : जयरामठाकुरः



**हिमसंस्कृतवार्ताः - बिलासपुरम्।** पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः बुधवासरे बरठीं-भल्लू बसदुर्घटनास्थलं गत्वा राहत-उद्धार-कार्यक्रमस्य समीक्षां कृतवान्। सः स्थले एव नियोजितानां कर्मचारिणां स्थितिं पृच्छन् बरठीं नागरिकचिकित्सालये मृतानां परिवारैः सह मिलित्वा शोकं प्रकटितवान्। पश्चात् सः मृतानां कतिपयानां अन्त्येष्टि-संस्कारे अपि भागं गृहीतवान्। सः अवदत् यत् स्थानीयनिवासिनः पूर्वं लोकनिर्माणविभागे अस्य संकटपूर्णस्थानस्य विषये उपालम्भं कर्तुं प्रवृत्ताः आसन्, परन्तु विभागेन किमपि कार्यं न कृतम्।

यदि समये एव कार्यम् कृतं स्यात् तर्हि एषा दुःखदः दुर्घटना निवारयितुं शक्यते स्म । सः सम्पूर्णघटनायाः अन्वेषणं कृत्वा एतादृशानां सर्वेषां संकटपूर्णानां स्थानानां तत्क्षणं पुनर्स्थापनं करणीयम् इति आग्रहं कृतवान् । वर्षर्तौ राज्यस्य प्राणानां सम्पत्तीनां च महती हानिः अभवत् इति विपक्षनेता अवदत्। अधुना सर्वकारेण सर्वेषां सम्भाव्य संकटपूर्णस्थानानां सर्वेक्षणं कृत्वा तेषां सुरक्षां सुनिश्चित्य भविष्ये एतादृशाः दुर्घटनानिवारयितुं आवश्यकम् अस्ति। सः दिवंगतानां प्राणानां शान्तिं, शोकग्रस्तपरिवारानाम् कृते अपि सामर्थ्यं च प्रदातुम् ईश्वरं प्रार्थितवान्, प्रशासनेन प्रभावितपरिवारेभ्यः तत्कालं अधिकतमं च सहायतां दातुं आग्रहं कृतवान्।

# कैलिफोर्निया-राज्येन दीपावली-उत्सवावसरे

## दिनद्वयस्य राजकीय-अवकाशः आधिकारिकतया स्वीकृतः




हिमसंस्कृतवार्ताः- डॉ नरेन्द्रराणा सिरमौरः । कैलिफोर्निया-राज्येन दीपावली-उत्सवावसरे दिनद्वयस्य राजकीय-अवकाशः आधिकारिकतया स्वीकृतः। पेंसिल्वेनिय-कनेक्टिकट-राज्ययोः पश्चात् कैलिफोर्निया अमेरिकायाः तृतीयं राज्यं अभवत्, येन दीपावली-उत्सवावसरे राजकीय-अवकाशः घोषितः अस्ति । कैलिफोर्निया-राज्यस्य गवर्नर गेविन न्यूसमः विधानसभासदस्येन एश कालरा इत्यनेन प्रस्ताविते विधेयके हस्ताक्षरं कृतवान् । एतत् विधेयकं राज्यकर्मचारिभ्यः वेतनप्राप्तावकाशं प्रदास्यति, विद्यालयाः उत्सवं आयोजयितुं च शक्नुवन्ति। भारतीयसमुदायेन एतस्य उपक्रमस्य प्रशंसा कृता अस्ति।

# प्रधानमन्त्री मुम्बई-नगरे नवीमुम्बई-अन्ताराष्ट्रिय-विमानस्थानकस्य प्रथम-चरणस्य अथ अन्यानां सम्पर्क-परियोजनानाञ्च उद्घाटनम् अकरोत्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना नवी मुम्बई-अन्ताराष्ट्रिय विमानस्थानकस्य प्रथम-चरणस्य, अन्य-सम्पर्क-परियोजनानाञ्च उद्घाटनं कृतम्। एतैः प्रकल्पैः विकासस्य अवसराणाञ्च वैश्विककेन्द्ररूपेण नगरस्यास्य स्थानं सुदृढं भविष्यतीति प्रधानमन्त्री अवदत्। अत्रान्तरे, युनटेड् किङ्ग्डम्-देशस्य प्रधानमन्त्री सर कीर स्टार्मर अपि भारतस्य प्रथम-आधिकारिकयात्रायै मुम्बई-नगरं प्राप्तवान्। एतयोः द्विदिवसयोः भ्रमणावसरे श्रीमोदी, श्रीकीरश्च द्वैपाक्षिक-चर्चासु भागं ग्रहीष्यतः, अथ च मुम्बई-नगरस्य जियोवरिया-केन्द्रे वैश्विक फिन्टैक्-इत्युत्सवस्य द्वितीये संस्करणे भागं भजिष्यतः।

# उपयोगितानलिकापरियोजनायाः निर्माणं शीघ्रं कर्तुं मुख्यमंत्रिणः अधिकारिभ्यः निर्देशः




**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शिमलानगरे ₹१४५ कोटिरूप्यकाणां उपयोगितानलिकानिर्माणपरियोजनायाः प्रगतेः समीक्षां कृतवान्। सः सार्वजनिकनिर्माणाधिकारिभ्यः छोटाशिमलातः विल्लीपार्कपर्यन्तं ७ किलोमीटर दीर्घायां नलिकायां शीघ्रं कार्यं कर्तुं निर्देशं दत्तवान्। सः अवदत् यत् छोटाशिमलातः ओकओवरपर्यन्तं निर्माणं प्रायः सम्पन्नम् अस्ति, आगामिषु १५ दिवसेषु तत् सम्पन्नं कर्तव्यम्। मार्गस्य टारिंगकरणं, वीथिप्रकाशस्थापनं च निर्देशितवान्।

मुख्यमन्त्री उक्तवान् यत् शिमला न केवलं हिमाचलप्रदेशस्य राजधानी अपि तु राज्यस्य प्रमुखं पर्यटनस्थलम् अपि अस्ति, तस्य आकर्षणं च अवश्यमेव निर्वाहितव्यम्। एतेन तन्त्रिजालात् नगरं मुक्तं भविष्यति, पर्यटकानां कृते उत्तमः अनुभवः च प्राप्यते। अस्याः महत्त्वाकांक्षिणः परियोजनायाः कार्यान्वयनेन शिमलानगरं प्रति पर्यटकानाम् आगमनं वर्धते। परियोजनायाः अन्तर्गतं छोटाशिमलातः विल्ली पार्कपर्यन्तं, राजभवनतः सचिवालयभूत्वा ओक ओवरपर्यन्तं, शेर-ए-पञ्जाबतः सीटीओभूत्वा लोअरबाजारपर्यन्तं च उपयोगितानालिकानां जालं विन्यस्यते। नलिकासु विद्युत्, जलरेखाः, अन्ये उपयोगिताकेबल च वहन्ति। अस्यां सभायां विधायकः हरीशजनार्था, सुरेशकुमारः लोकनिर्माणविभागस्य वरिष्ठाधिकारिणः च उपस्थिता अभवन्।

# संस्कृतेः रक्षणार्थं संस्कृत भाषायाः महती आवश्यकता- डॉ. सुमन रानी



**हिमसंस्कृतवार्ताः।** सप्ताहस्य शुक्रवासरशनिवासरयोः संस्कृतभारती हरियाणा (न्यासः) एवं स्वामिदयानन्दसरस्वतीपीठस्य संयुक्ततत्त्वावधाने आयोजितस्य संस्कृतपठनकेन्द्रस्य कक्षा संजाता। कार्यक्रमेऽस्मन् सर्वप्रथमं सरस्वतीमातुः समक्षं दीपं प्रज्वाल्य डॉ. सुमन रानी स्वस्य पाठनं प्रारब्धवती। संस्कृतभारत्याः सरलशैल्यां पाठनं छात्रेषु रुचिं सम्पादयति। पाठनशैलीं दृष्ट्वा विद्यालयस्य सर्वे शिक्षकाः छात्राश्च प्रसन्नाः आसन्। सुमनमहोदया साप्ताहिकीं कक्षां स्वीकुर्वती उक्तवती यत् "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"। अवसरेऽस्मिन् अशोकबुचोलीमहोदयोऽपि अस्य कार्यक्रमस्य प्रशंसामकरोत्। तेनोक्तम् यत् बालानां संस्कारार्थं एतादृशाः कार्यक्रमाः अत्यन्तावश्यकाः सन्ति। राष्ट्रस्य कर्णधाराः एते बालाः एव सन्ति। एते बालाः एव भविष्ये राष्ट्रस्य उन्नायकाः भविष्यन्ति। विद्यालयस्य प्रधानाचार्योऽपि उक्तवान् यत् संस्कृतभाषां विना संस्कृतेः संस्काराणां च कल्पनापि न भवितुमर्हति। संस्कृतेन विना एकस्य सभ्यसमाजस्य निर्माणं न भवितुमर्हति। अतः सर्वेभ्यः संस्कृतभाषा अनिवार्या वर्तते। अन्ये शिक्षकाः अपि स्वविचारान् प्रकटीकृतवन्तः। कार्यक्रमेऽस्मिन् प्राचार्यः श्रीमान् ओम कुमारः, सुशीला, राजीवः, राजेशः यादवः, भुनेशशर्मा, ललित कुमारः, कर्णसिंहः ,आरतीशर्मा, अजीतः, विजयसिंहः, पूनमः, सीमा, सेवासिंहः, राधेश्यामः , सत्यबीरः ,अनिलः ,वेदः, सुधीरः, शोधार्थी मनीषा इत्यादयः बहवः अध्यापकाः उपस्थिताः आसन्।

# हरिद्वारे अस्थि-विसर्जनार्थं हिमाचलपथपरिवहननिगमेन निःशुल्कयात्रा व्यवस्थायै प्रदत्तम् अनुज्ञापत्रम्

## गमनागमनस्य नैव स्वीक्रियते भाटकम्- उपमुख्यमन्त्री



**हिमसंस्कृतवार्ताः - बिलासपुरम्।** हिमाचलपथपरिवहननिगमः बरठींसमीपस्थे भल्लुस्थाने निजीबसदुर्घटनायां पीडितानां अस्थिविसर्जनार्थं हरिद्वारं प्रति गन्तुम् आगन्तुं च निःशुल्कयात्राम् अयच्छत्। मृतानां प्रत्येकं परिवाराय त्रीणि अनुज्ञापत्राणि प्रदत्तानि सन्ति। एतानि अनुज्ञा-पत्राणि परिवारेभ्यः स्वगृहेषु एव प्रदत्तानि आसन् । इयं व्यवस्था बिलासपुर-आगारस्य-उप-मण्डलीयप्रबन्धकेन विवेकलखनपालेन उपमुख्यमन्त्रिणा परिवहनमन्त्रिणा मुकेश-अग्निहोत्रिणा आदेशेन कृता ।समाचारानुसारं मंगलवासरे सायं भल्लूतः प्रत्यागच्छन्तं निजबसयानं मरोतनात् बरठी-मार्गेण घुमारवीं-नगरं प्रति निर्धारितमार्गेण भूस्खलनेन दुर्घटितम् अभवत्, यस्मिन् १६ जनानां मृत्युः अभवत् दुर्घटनां ज्ञात्वा उपमुख्यमन्त्री मुकेश अग्निहोत्री कुल्लुनगरे दशहरा-उत्सवं त्यक्त्वा बिलासपुरं प्रति प्रस्थितवान् । सः स्थलस्य निरीक्षणार्थं मध्यरात्रौ १ वादने बिलासपुरस्य बरठीम् आगतः। सर्वकारेण पीडितानां कृते सर्वेषां सम्भाव्यसहायतायाः आश्वासनं दत्तम् अस्ति।

## प्रभावितपरिवाराणाम् आश्रयः अभवत् सर्वकारः

उपमुख्यमन्त्री मुकेश अग्निहोत्री एचआरटीसी बिलासपुर-आगारस्य उपमण्डलाधिकारिणं विवेकलखनपालं प्रभावितपरिवारेभ्यः अस्थिविसर्जनार्थं हरिद्वारं गन्तुं निःशुल्कं बसपासं प्रदातुं आदेशं दत्तवान्। शीघ्रं कार्यं कुर्वन् विवेकलखनपालः प्रभावितपरिवारेभ्यः निःशुल्कबसपास् निर्गमनस्य व्यवस्थां कृत्वा गृहं प्रेषितवान्। लखनपालस्य मते प्रत्येकस्य मृतकस्य परिवारेभ्यः त्रीणि निःशुल्क-अनुज्ञापत्राणि प्रदत्तानि


# षट् तहसीलदाराः एचएएस-पदे पदोन्नताः, नियुक्ति-सम्बन्धि-आदेशाः निर्गताः

हिमसंस्कृतवार्ताः - शिमला। राज्यसर्वकारेण षट् तहसीलदाराः एच.ए.एस. पदे पदोन्नताः कृताः । पदोन्नताः भूत्वा एच.ए.एस. अधिकारिषु अजयकुमारः सिंहः, विवेककुमारः नेगी, राजेशकुमारः, जगदीशचंदः, चेतनचौहानः संजीत; शर्मा च सम्मिलिताः सन्ति। अस्य विषये कार्मिकविभागेन अधिसूचना प्रकाशिता अस्ति। एतेषां अधिकारिणां पदस्थापनस्य आदेशाः पृथक् पृथक् निर्गताः भविष्यन्ति।

# जी. डी. गोयनका विद्यालयस्य प्राचार्यः

## श्री विनोदकुमार भाटियाः आकस्मिकरूपेण दिवंगतः

### *शिक्षाक्षेत्रे शोकतरङ्गः, सर्वे जनाः शोकसन्तप्ताः*




**हिमसंस्कृतवार्ता - कुणाल पाण्डेय।** मोतीहारी नगरस्य विख्यातस्य शैक्षणिकसंस्थानस्य जी. डी. गोयनका विद्यालयस्य प्राचार्यः श्री विनोदकुमार भाटियाः आकस्मिकेन हृदयाघातेन निधनं प्राप्तवन्तः। एषः समाचारः सर्वेषां कृते अत्यन्तं दुःखदः हृदयविदारकश्च भवति। तेषां निधनस्य वार्ता सम्पूर्णं शिक्षाजगत् शोकसन्तप्तं कृतवती अस्ति।श्री भाटियाः एकः समर्पितः, अनुशासितः, तथा विद्यार्थिनां हितेषु सदैव तत्परः शिक्षाविद् आसन्। तेन विद्यालयं नूतनैः आदर्शैः, उत्कृष्टशिक्षया, सांस्कृतिकैः कार्यक्रमैः च उन्नतिपथं प्रति नीतम्। तस्य नेतृत्वे विद्यालये शैक्षणिकक्षेत्रे च सांस्कृतिकक्षेत्रे च उल्लेखनीया सिद्धिः प्राप्ता।तेषां निधनस्य पश्चात् विद्यालये शोकसभा आयोजिता आसीत्। सर्वे शिक्षकाः, विद्यार्थीगणः, अभिभावकाः च मिलित्वा द्विमिनिटं मौनं धारयित्वा दिवंगतस्य आत्मनः प्रति श्रद्धांजलिं अर्पितवन्तः। सर्वे जनाः एतद् उक्तवन्तः यत् भाटियास्य स्नेहः, मार्गदर्शनं, प्रेरणा च अस्माकं जीवनस्य मार्गदर्शकत्वेन सदा स्मरणीयं भविष्यति।नगरस्य शिक्षाविदः, समाजसेविनः च तेषां निधनं शिक्षाक्षेत्रस्य अपूरणीयहानिं इति निर्दिष्टवन्तः। सर्वे ईश्वरं प्रति प्रार्थनां कुर्वन्ति यत् दिवंगतस्य आत्मा श्रीचरणयोः स्थानं प्राप्नुयात्, तथा शोकाकुलपरिवारं एतत् दुःखं सहितुं शक्तिं लभेत्।

# बिहारराज्यस्य डीएवीपब्लिक-स्कूलबरारीभागलपुरविद्यालये एकलनृत्यप्रतियोगिता सम्पन्ना




**हिमससंस्कृतवार्ताः डॉ. विमलेश झा, भागलपुरम्,** बिहारराज्यस्य डीएवीपब्लिकस्कूलबरारीभागलपुरविद्यालयस्य प्राङ्गणे एकलनृत्यप्रतियोगिता आयोजनम् अभवत् । अस्यां प्रतियोगितायां तृतीयकक्षातः पञ्चमीकक्षापर्यन्तं चतुर्विंशतिः छात्राः विविधगीतध्वनिमुद्रिकानुसारं मनोहराणि नृत्यानि प्रदर्शितवन्तः। कार्यक्रमस्य अन्ते सर्वे प्रतिभागिनः एकत्र मिलित्वा समूहनृत्यमपि प्रस्तुतवन्तः। एकलनृत्ये बालिकाः बालकाःच शास्त्रीय-गुजराती-मराठी-राजस्थानी - झारखंडीलोकनृत्यानि च प्रस्तुतवन्तः। केचन बालकाः देशभक्तिगीतानि आधृत्य अपूर्वं नृत्यं प्रदर्शितवन्तः। सर्वाणि नृत्यानि उत्तमानि आसन् । बालानां वेषभूषा,साजसज्जा, भावभङ्गिमाः च सर्वेषां हृदयानि आह्लादितवन्तः।प्रतियोगितायां तृतीयकक्षातः कैरवी सिंह, सुभांसी सिंहा, काश्वी रानी, पृषाराज, अनन्या, नव्या झा, आरोही कुमारी, तिजी कुमारी,चतुर्थकक्षातः मानवी कुमारी, भारती, अर्पित शर्मा, अनुष्मा कुमारी, शुभांगी, श्रेयसी भारद्वाज, ऐसानी कुमारी, श्रुति कुमारी, कुमारी आराध्या, पञ्चमकक्षातः आस्था सिंहः, कृतिका कुमारी, आदित्य सिंहः, सृष्टि सिंहः, आस्था कुमारी, प्रख्या तिवारी, आराध्या राज, हर्षिता इत्यादयः छात्राः भागं गृहीत्वा स्वनृत्यस्य प्रदर्शनम् अकुर्वन् । प्रतियोगितायाः संचालनं विद्यालयस्य शिक्षिका श्रीमती प्रीति चन्द्रामहोदया कृतवती । प्रतियोगितायाः निर्णायकौ श्रीमतीप्रगति मिश्रा ,श्री आशीष कुमार दासमहाशयौ च आस्ताम्। दर्शकरूपेण विद्यालयस्य पञ्चमकक्ष्यायाः सर्वे छात्रछात्राः उपस्थिताः आसन्। अस्मिन् अवसरे विद्यालयस्य प्राचार्यः सह सहायक क्षेत्रीयाधिकारी श्री अनिलकुमारमहोदयः प्रतिभागिनां प्रदर्शनं दृष्ट्वा उक्तवन्तः यत्, " इमाः प्रतियोगिताः छात्राणाम् आत्मविश्वासस्य रचनात्मकतायाश्च विकासाय सहायकाः भवन्ति।" कार्यक्रमस्य सफलतायाः कृते विद्यालयस्य शिक्षकशिक्षिकाणां श्री निरेन्द्र प्रकाशः सिंहः, श्रीमती शुभ्रा वर्मा, श्रीमतीनिशि भारती, डॉ. विमलेश झा, श्री शशि शेखरसिंहः, श्री अभिनवकुमारः, श्रीमतीकविता कुमारी, सुश्री पूजा कुमारी, श्रीमतीरीता यादव, श्रीमतीप्रेरणा प्रवीणः, श्रीसुभोजित गोस्वामी, श्रीअविनाश कमारः, श्रीशैलेशकुमारसिंहः, श्री गवेन्द्रनारायणसिंहः, श्री देवाशीष भारती, श्री गौतमकुमारः, श्रीमती रोमी सिंघी इत्यादीनां भूमिका प्रशंसनीया आसीत्।




***लौकिकन्यायकोशः*"**
**(३२४)**
***खड्गकोशन्यायः*"**

यदा खड्गस्य प्रयोगस्य अवसरो न भवति तदा स खड्गः कोशे एव भवति । एवं यदि कश्चन मनुष्यः कोषमेव दृष्ट्वा तदन्तः खड्गेन भाव्यमिति मत्वा भीतः पलायनं करोति चेत् सः कियान् भीरुः भवेत्? स्वकल्पनाकारणेन मनुष्यः भीतो भवतीति बोधयितुम् अस्य न्यायस्य प्रयोगः क्रियते।

**डा वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

# अद्यतन-वार्ता-संवादः




**नन्दिनी-** नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्यतनीषु वार्तासु बहवः विषयाः सन्ति। प्रथमा वार्ता तु भारतीयानां कृते आशापूर्णा अस्ति। संयुक्त-अधिराज्यस्य प्रधानमन्त्री भारतम् आगतवान् अस्ति। सः भारतीयानां कृते प्रवेश-अनुज्ञा-नियमान् सरलीकर्तुं वचनं दत्तवान् अस्ति।


**नन्दिनी-** आम्, एतत्तु अतीव उत्तमं वचनम्। यदि नियमाः सरलाः भवेयुः तर्हि बहुभ्यः जनेभ्यः लाभः भविष्यति। इतः परं, बिहार-राज्यस्य विषये एका वार्ता श्रूयते। निर्वाचन-पूर्व-समीक्षणेन सूचितं यत् नीतीशकुमारः पुनः मुख्यमन्त्री भवितुं शक्नोति इति।

**काव्या-** निर्वाचनस्य फलं यत्किमपि भवतु, प्रजानां हितं सर्वोपरि तिष्ठेत्। परन्तु हिमाचलप्रदेशात् एका दुःखदा वार्ता आगता। बिलासपुरे भूस्खलनेन एकं बसयानं ग्रस्तम्। तस्यां दुर्घटनायाम् न्यूनातिन्यूनं पञ्चदश जनाः मृताः। प्रधानमन्त्री अपि मृतानां परिवारेभ्यः साहाय्यं घोषितवान् अस्ति।

**नन्दिनी-** अहो, महद्-दुःखस्य विषयः। एतादृशीषु प्राकृतिक-आपत्सु सर्वदा सामान्याः जनाः एव पीड्यन्ते। अन्तिमा वार्ता अपि चिन्ताजनका अस्ति। हरियाणा-राज्यस्य एकः आरक्षक-महानिरीक्षकः चण्डीगढ-नगरे स्वगृहे मृतः प्राप्तः। आरक्षकाः इदम् आत्महत्या इति मन्यमानाः अन्वेषण-रताः।

**काव्या-** आम्, एषा वार्ता नितरां दुःखदा। तस्य परिवारस्य कृते मम संवेदनाः। अद्यतनीषु वार्तासु एतावदेव। श्वः पुनर्मिलिष्यामः। धन्यवादः।

**ईदर-धीरजः,हैदराबादः**



# महाराष्ट्रस्य साधुः चोखामेला

चोखामेला (१३००-१४००) महाराष्ट्रस्य प्रसिद्धः साधुः आसीत् यः अनेकान् अभङ्गान् रचितवान् । अत एव सः भारते दलित-महार-जातेः प्रथमः महाकविः इति उच्यते । भक्तिकाले सामाजिकवैषम्यं प्रकाशयन् सामाजिकपरिवर्तन-आन्दोलने चोखामेला प्रथमः साधुः आसीत् । स्वकृतिषु सः दलितसमुदायस्य विषये अतीव चिन्तितः दृश्यते । चोखामेलायाः जीवनस्य विषये अत्यल्पाः सूचनाः उपलभ्यन्ते । सन्तनामदेवः (१२७०-१३५०) तस्य गुरुः इति कथ्यते, तस्मात् तस्य कालः अस्मिन् काले एव आसीत् इति अनुमीयते । चोखामेला महाराष्ट्रस्य महारजात्याः आसीत् । बुल्ढानामण्डलस्य दिओलग्रामस्यतहसीलस्य अन्तर्गतं मेहुनाराजग्रामे तस्य जन्म अभवत् । चोखामेला बाल्यकालात् एव विठोबा (विष्णु) भक्तः आसीत् । हिन्दुसमाजस्य तथाकथितानां निम्नजातीनां जनानां अन्यः आश्रयः नासीत्, अतः गम्भीरस्वभावयुक्ताः ईश्वरभक्तिं एकमात्रं त्राता इति मन्यन्ते स्म । ईश्वरस्य तथाकथितस्य मन्दिरस्य प्रवेशमपि न कृतम् इति भिन्नः विषयः । एकदा चोखामेला पन्धरपुरम् आगता यत्र संतनामदेवः कीर्तनं कुर्वन् आसीत् । नामदेवमहाराजस्य कीर्तनेन सः मंत्रमुग्धः अभवत् । नामदेवः विठ्ठलस्य भक्तः आसीत्, तस्मिन् समये पंढरपुरे निवसति स्म । नामदेवस्य आकर्षणं विठ्ठलभक्तिः च चोखामेलां पन्धरपुरं प्रति आकर्षितवती । सः स्वपत्न्या सोयरा, पुत्रकर्ममेला च सह पन्धरपुरस्य समीपे मङ्गलवेड्-नगरे निवसति स्म । चोखमेला नित्यं पन्धरपुरं गच्छन् विठोबा दर्शनार्थं, मन्दिरस्य स्वच्छतां च करोति स्म । परन्तु महारजनत्वेन तस्य मन्दिरस्य प्रवेशः न भवति स्म । चोखामेला इत्यस्य निर्मला इति भगिनी आसीत्, या विथोबाभक्ता आसीत् । चोखामेलस्य एकः शिष्यः बङ्का अपि उल्लिखितः अस्ति । बङ्का चोखमेलायाः पत्नी सोयरायाः भ्राता आसीत् ।